# Shivavishnukanchi Stuti

# शिवविष्णुकाञ्चीस्तुतिः

## Document Information

Text title : Shivavishnukanchi Stuti

File name : shivaviShNukAnchIstutiH.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# शिवविष्णुकाञ्चीस्तुतिः

काञ्चीपुरीमहं मन्ये काञ्चिदेकां विभोः कलाम् ।
विकला अपि यद्योगा सकलात्मत्वभाजनम् ॥ १॥

काञ्ची यथा हि वस्त्रोर्ध्वं युवते राजते कटौ ।
काञ्ची तथाब्धिवस्त्राया वस्त्रप्रान्ते विराजते ॥ २॥

पञ्चमी मुक्तिपुर्येषा पञ्चमी योगभूरिव ।
पञ्चता तस्य न पुनः पञ्चतात्रास्य जन्मिनः ॥ ३॥

शिवविष्णुपुरी काञ्ची कांश्चिच्चित्तां हरेन्न किम् ।
न किञ्चिदपि यद्दृष्ट्या पापं तिष्ठति देहिनाम् ॥ ४॥

वाराणसी ह्युदक्काशी पापराशीविनाशिनी ।
तथा दक्षिणकाशीयं मुक्तिद्वारमपावता ॥ ५॥

अतिवेगवतीयमवाच्यां वेगवती सरिदत्र हि काञ्च्याम् ।
सतिवेगवती गुरुगीता वेगवतीं भिदमात्मनि कुर्यात् ॥ ६॥

एकाभ्रकेशाभिधभूमिलिङ्गं कामाभ्यभीष्टार्थदमात्मलिङ्गम् ।
सपद्यविद्यावरणं निरस्य प्रदर्शय त्वात्मनि मे चिरस्य ॥ ७॥

वरदराजवरावितदुर्हृदं वरदराजमुपाश्रितसद्धृदम् ।
वरदरारिकरं प्रणमाम्यजं वरदरान्तकरं तमधोक्षजम् ॥ ८॥

परिहृतविनतार्तिर्वारितस्वीयजूर्ति-
र्भुवनरुचिरमूर्तिर्भक्तकामप्रपूर्तिः ।
जयति वरदराजो भक्तचित्तानुवर्ती
निजभजकपतिर्दिङ्मालिनी यस्य कीर्तिः ॥ ९॥

इति श्रीवासुदेवानन्दसरस्वतीविरचिता श्रीशिवविष्णुकाञ्चीस्तुतिः समाप्ता ।

*Shivavishnukanchi Stuti*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*